व्यथितोऽब्रवीत् । यद्यर्द्धदिवसं द्रोणो युध्यते मन्युमास्थितः । सत्यं ब्रवीमि ते सेना विनाशं समुपैष्यति । स भवांस्त्रातु नो द्रोणात् सत्याज्ज्यायोऽनृतं पुनः । अनृतं जीवितस्यार्थे वदन्न स्पृश्यतेऽनृतैः । कामिनीषु विवाहेषु गवां भक्ते तथैव च । ब्राह्मणाभ्युपपत्तौ च अनृते नास्ति पातकम् । तयोः संवदतोरेवं भीमसेनोऽब्रवीदिदम् । श्रुत्वैव ते महाराज वधोपायं महात्मनः । गाहमानस्य मे सेनां मालवस्येन्द्रवर्म्मणः । अश्वत्थामेति विक्रान्तो गजः शक्रगजोपमः । निहतो युधि विक्रम्य ततोऽहं द्रोणमब्रुवम् । अश्वत्थामा हतो ब्रह्मन्निवर्त्तस्वाहवादिति । नूनं नात्र स्पृषावाक्यमेवं मे पुरुषर्षभ । स त्वं गोविन्दवाक्यानि मानयस्व जयैषिणः । द्रोणाय निहतं शंस राजन् ! शारद्वतीसुतम् । त्वयोक्तो नैष युध्येत जातु राजन् द्विजर्षभः । सत्यवान् हि त्रिलोकेऽस्मिन् भवान् ख्यातो जनाधिप ! । तस्य तद्वचनं श्रुत्वा कृष्णवाक्यप्रचोदितः । भावित्वाच्च महाराज ! वक्तुं समुपचक्रमे । तमतथ्यभये मग्नो जये सक्तो युधिष्ठिरः । अव्यक्तमब्रवीद्वाक्यं हतः कुञ्जर इत्युत । तस्य पूर्व्वं रथः पृथ्व्यां चतुरङ्गुल उत्तमः । बभूवैवन्तु तेनोक्ते तस्य वाहोऽस्पृशन्महीम्" । "अश्वत्थामा हत इति पृथासूनुना स्पष्टमुक्त्वा स्वैरं शेषे गज इति किल व्याहृतं सत्यवाचा" इति वेणीसं० । [चारिणि स्त्रियां ङीप् ।

**अश्वत्थिक** त्रि० अश्वत्थेन चरति पर्पा० ष्ठन् । अश्वत्थफलक

**अश्वत्थी** स्त्री० क्षुद्रोऽश्वत्थः अल्पार्थे ङीप् । क्षुद्रपिप्पले ह्रस्वपत्रे वनजाते अश्वत्थाकारे क्षुद्रवृक्षभेदे स्वार्थे कन् अश्वत्थिकाऽप्यत्र ।

**अश्वदंष्ट्रा** स्त्री अश्वस्य दंष्ट्रेवाकारेण । गोक्षुरवृक्षे ।

**अश्वनाय** पु० अश्वं नयति अण्–उप०स० । अश्वपालके ।

**अश्वन्त** पु० अश्वस्य व्यापकस्य धर्मस्यान्तो यत्र शक० । १अशुभे २क्षेत्रे ३मृते ४चुल्ल्यां च हेम० प्राणिहिंसास्थानत्वात्तस्यास्तथात्वम् ।

**अश्वप** पु० अश्वं पाति पा–क । हयपालके । [नृपभेदे च ।

**अश्वपति** पु० ६त० । वाजिपालके रामायणप्रसिद्धे कैकेये

**अश्वपत्यादि** पु० प्राग्दीव्यतीयेऽर्थे अण्प्रत्ययनिमित्ते पाणिन्युक्ते शब्दसमूहे स च गणः अश्वपति ज्ञानपति शतपति धनपति गणपति स्थानपति यज्ञपति वादपति, कुलपति गृहपति धान्यपति धन्वपति बन्धुपति, धर्म्मपति सभापति प्राणपति क्षेत्रपति, । आश्वपतम् पत्यन्तत्वेऽप्यवादात् न ण्यः ।

**अश्वपर्ण** त्रि० अश्वानां पर्णं गमनं यत्र । अश्वगमनयुक्ते १रथे अश्वं व्यापि पर्णं पतनं यस्य । २व्यापिगमने मेघे च । "आविद्युन्मद्भिर्मरुतः स्वर्कैं रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः" ऋ० १,८८,१ । यथा व्युत्पत्तिर्दर्शिता तथैव भाष्ये उक्ता । [लोपः । हयपादतुल्यचरणे ।

**अश्वपाद** त्रि० अश्वस्य पाद इव पादोऽस्य हस्त्या० नान्त्य

**अश्वपाल** पु० अश्वान् पालयति पा+णिच्–लन् अण् । घोटकरक्षके । स्त्री० ण्वुल् । अश्वपालकोऽप्यत्रार्थे ।

**अश्वपुच्छी** स्त्री अश्वस्य पुच्छमिव केशरोऽस्य । माषपर्णीवृक्षे ।

**अश्वपेज** पु० ऋषिभेदे । तेन प्रोक्तमधीयते शौनकादि० णिनि । आश्वपेजिनः तत्प्रोक्ताध्यायिषु ब०व० ।

**अश्वपेशस्** त्रि० अश्वेन पेशो रूपं रूपणीयं निरू० यस्य । अश्वेन रूपणीये । "गोअग्राममश्वपेशसम्" ऋ० २,१,१६ । "अश्वपेशसमश्वेन निरूपणीयां रातिम्" भा० ।

**अश्ववडव** पु० अश्वश्च वडवा च । अश्ववडवरूपसमासार्थे न परवल्लिङ्गम् ।

**अश्ववाल** पु० अश्वस्य बालः केशर इव तदाकारपुष्पत्वात् । (कासा) इति ख्याते १कासे । ६त० अश्वस्य २केशे च ।

**अश्वबाहु** पु० यदुवंश्यचित्रकस्य पुत्रभेदे । "क्रोष्टोस्तु शृणु राजेन्द्र ! वंशमुत्तमपौरुषम् । यदोर्वंशधरस्याथ" इत्युपक्रम्य । "गान्धारी चैव माद्री च क्रोष्टोर्भार्य्ये बभूवतुः" इत्युक्त्वा "माद्र्याः पुत्रौ च जज्ञाते सुतौ वृष्णन्धकावुभौ । जज्ञाते तनयौ वृष्णेः श्वफल्कश्चित्रकस्तथा" इत्युक्त्वा श्वफल्कवंशमुक्त्वा च । चित्रकस्याभवन् पुत्राः पृथुर्विपृथुरेव च । अश्वग्रीवोऽश्वबाहुश्च सुपार्श्वकगवेषणौ । अरिष्टनेमिरश्वश्च सुधर्म्मा धर्म्मवित्तथा । सुबाहुर्बहुबाहुश्च श्रविष्ठाश्रवणे स्त्रियौ" हरि० ३४,३५, अध्या० ।

**अश्वमहिषिका** अश्वमहिषयोर्वैरम् वुन् । अश्वमहिषयोर्वैरे ।

**अश्वमार** पु० अश्वं मारयति मृ–णिच् अण् । करवीरे स्त्री० ण्वुल् । अश्वमारकोऽप्यत्र ।

**अश्वमुख** पु० अश्वस्य मुखमिव मुखमस्य । अश्वाकारमुखे पुरुषाकाराङ्गे किन्नरे । जातित्वात् स्त्रियां ङीप् "भिन्दन्ति मन्दां गतिमश्वमुख्यः" कुमा० अश्ववदनादयोऽप्यत्र ।

**अश्वमेध** पु० अश्वः प्रधानतया मेध्यते हिंस्यतेऽत्र मेध–हिंसने घञ् । यज्ञभेदे स च शत०ब्रा० १३काण्डे पञ्चभिरध्यायैरुक्तः । यजु० २४ अ० तदीययूपपशुविशेषा विहिता यथा । तत्राद्यमन्त्रोपोद्घाते यजु०वे०दी० उक्तम् ब-